तं वेदितव्यं इत उत्तरं यदित ऊर्ध्वमनुक्रमिष्यामः इणः कवर्गाच्चेत्येवं तद्वेदितव्यं वक्ष्यति आ
देशप्रत्यययोः सिषेवे सुष्वाप अग्निषु वायुषु कर्तृषु हर्तृषु गोषु नौषु गीर्षु
धूर्षु वाक्षु त्वक्षु इणकोरिति किं दास्यति ग्रसौ ५६ नुम्विसर्जनीयशर्व्यवायेऽपि नु
म्व्यवाये प्रत्येकमभिसंबध्यते नुम्व्यवाये तावत् सर्पींषि यजूंषि धनूंषि ह
वींषि विसर्जनीयव्यवाये सर्पिःषु यजुःषु शर्व्यवाये सर्पिष्षु यजुष्षु हवि
ष्षु नुमादिभिः प्रत्येकं व्यवाये विधानात् समस्तैः तेनेह न भवति निंस्से निंस्क्ष्व
सि तृंहणं यत्र समस्तस्यैतद्रूपं तत्रैव नुमाद्यव्यवधानात् ५७ आदेशप्रत्य
ययोः आदेशस्य यः सकारः प्रत्ययस्य च यः सकारस्तस्य इणकोरुत्तरस्य मूर्धन्यो
भवति आदेशः सिषेवे सुष्वाप प्रत्ययस्य अग्निषु वायुषु कर्तृषु हर्तृषु इणो गाव
त वान्त सदेशानयदादिति व्यपदेशवद्भावात् प्रत्ययस्येति भवति यजनेर्वेदितव्य
पंचमे लकारे परस्मैपदे प्रथमैकवचने इकारलोपे लेटोऽडाटौ सिब्बहुलं
लेटीति सिप् तत्र सिद्धं वदान् यक्षदादिति ५८ शासिवसिघसीनां च शासिवसिघसीत्येते
षां च इणकोरुत्तरस्य सकारस्य मूर्धन्यो भवति अन्वशिषत् अन्वशिषतां अन्वशिषन्
तृतीयषु उषितः उषितवान् उषित्वा घसेः जक्षतुः जक्षुः अक्षन्नमीमदन्त पितरः अन्नादेशः
घसि वचनं ह्यासिद्धं तत्र घस्यादेशः सकारस्यादेशो न भवति इणकोरित्येव वसति
जघास ५९ स्तौतिण्योरेव षण्यभ्यासात् स्तौतेर्ण्यन्तानां च निमित्तभूते परतः अभ्यासात्
उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति तुष्टूषति ण्यन्तानां सिषेवयिषति सिषे
जयिषति सिषञ्जयिषति सुष्वापयिषति सिद्धे सत्यारम्भो नियमार्थः स्तौतिण्योरेवेति

424 428

एवाभ्यासात् स्तौतेर्ण्यन्तानां च निवृत्तये यत्नः; अभ्यासादिणः परस्यादेशः सकारस्य
मूर्धन्यादेशो भवति तुष्टूषति एवन्तानां सिषेवयिषति सिसेवयिषति सिष्वज
यिषते सुष्वापयिषते सिषेसत्वारंभो नियमार्थः; स्तौतिण्योरेव षण्येवाभ्यासे
षत्वं स्यादन्यस्य माभूत् सिसिक्षति सुसूषति एवकारकरणमिष्टतोवधारणार्थं
स्तौतिण्योः षण्येवेति किं विजुगायमाने तुष्टाव तत्र च न स्यात् इण्वत्स्यादेव सिसि
षेवतीति षणीति किं अन्यत्र नियमो माभूत् सिषेवको विनते तुष्टोध; अविनु
ते नियमो माभूत् सुषुप्सतिकः; सानुबंधेनुरोधः षण्मात्रे नियमो माभूत् सुष
विषइष्टे अभ्यासादिति किं अभ्यासाद्याप्तिरस्या नियमो यथा स्यात् धातोर्वा
प्राप्ति तस्या नियमो माभूत् प्रतीषिषति अधीषिषति ६० सः; स्विदिस्वदिसहीनां च
स्विदिस्वदिसहि इत्येतेषां एवन्तानां सनिवृत्तये यत्नः; अभ्यासादुत्तरस्य सकार
स्यादेशो भवति स्वदिसि स्वादयिषति स्विद सिस्वेदयिषति सहसमर्थे षो सिसा
हयिषति सकारस्य सकारवचनं मूर्धन्यादेशो निवृत्यर्थं ६१ प्राक्सितादड्
व्यवायेपि सेवसितेति च सूपति प्राक् सितसंशब्दनादिति तत्र मनुक्रमितया
मसत्वाद् व्यवायेपि मूर्धन्यो भवतीत्येवं तद्विज्ञेयं अपिशब्दादनड्व्यवायेपि
वेदयति उपसर्गात्सुनोति सुवति स्यतीति षत्वं अभिषुणोति परिषुणोति निषुणोति
अभ्यषुणोत् पर्यषुणोत् न्यषुणोत् ६२ स्थादिष्वभ्यासेन चाभ्यासस्य उपसर्गात्सुनो
ति सुवति स्यति स्तौत्यादयः सेनयसेधयति सिचोतिवदयति स्थादयः; तेषु स्थादिषु प्रा
क्सितात् संशब्दनादभ्यासेन व्यवाये मूर्धन्यो भवति अभ्यासस्य सकारस्य च भव
तीत्येवं तत् वेदितव्यं अभ्यासेन व्यवाये अप्राप्ते वचनं अभिषिषेव
यिषति अवर्णान्ताभ्यासार्थं च परितष्टौ षाद्रि प्रतिविधायं च अभिषि

षेणायिषति अवर्णान्ताभ्यासार्थं च अभितुष्टौ परितुष्टौ षणित्रति षेधार्थं च अ-
भिषिषिक्षति परिषिषिक्षति अभ्यासस्येति वचनं नियमार्थं स्यादिष्वेवा-
भ्यासस्य कमूस्य मूर्द्धन्यो भवति नान्यत्र अभिसुसूषति अभिसिषासति ६५ उ-
पसर्गात्सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्व-
ञ्जां उपसर्गात्स्थान्निमित्तादुत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था से-
नय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्द्धन्यो भवति सुनोति अ-
भिषुणोति परिषुणोति अभिषुणोतु सुवति अभिषुवति परिषुवति अभ्यषुव-
त् पर्यषुवत् स्यति अभिष्यति परिष्यति अभ्यष्यत् पर्यष्यत् स्तौति अभिष्टौ-
ति परिष्टौति अभ्यष्टौत् पर्यष्टौत् अभिष्टौतु परिष्टौतु स्तोभति अभिष्टोभते प-
रिष्टोभते अभ्यष्टोभत् पर्यष्टोभत् स्था अभिष्ठास्यति परिष्ठास्यति अभ्यष्ठात् प-
र्यष्ठात् अभितष्ठौ परितष्ठौ सेनय अभिषेणयति अभिषेणयति परिषेणयति
अभ्यषेणयत् पर्यषेणयत् अभिषिषेणयिषति परिषिषेणयिषति सेध अ-
भिषेधयति परिषेधति अभ्यषेधत् पर्यषेधत् अभिषिषिक्षति परिषिषिक्ष-
ति विकरणनिर्देशः सिध्यति निवृत्त्यर्थः सिच अभिषिञ्चति अभिषिषिक्षति परिषि-
षिक्षति सञ्ज अभिषजति परिषजति अभ्यषजत् पर्यषजत् अभिषिषङ्क्षति परि-
षिषङ्क्षति अभिष्वजते परिष्वजते अभ्यष्वजत पर्यष्वजत अभिषिष्वङ्क्षते परिषिष्व-
ङ्क्षते उपसर्गादिति किं दधि सिञ्चति निर्गतः सेचकोऽस्मान्निःसेचको देशः नायमि-
होपसर्गः तथा चापि अभिषिषावयिषति अभिसावकीयति अभिसावकीयतीत्यत्र सुनोति-
र्णिजन्तः क्रियायोगः इति षत्वं भवति ६६ सदिरप्रतेः सदेः सकारस्य उपसर्गस्थान्नि-
मित्तादप्रतेरुपसर्गस्य मूर्द्धन्यो भवति निषीदति विषीदति न्यषीदत्

अषीदत् न्यषदत् विषदत् अप्रातेरिति किं प्रतिसीदति ६५ स्तंभेः उपसर्गादिति व
र्त्तते स्तंभेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्द्धन्य आदेशो भवति अभि
का ष्टभ्नाति परिष्टभ्नोति अभितष्टंभ पर्यतष्टंभ अप्रतेरित्येतन्न दिक्नानुवर्त्तते प्रति
श्री ष्टभ्नाति प्रत्यष्टभ्नात् प्रतितष्टंभ ६६ अवाच्चालंबनाविदूर्ययोः अवशब्दादुपसर्गा
दुत्तरस्य स्तंभेः सकारस्य मूर्द्धन्य आदेशो भवति आलंबनेर्थे आविदूर्ये च आलं
बनं समाश्रयः अविदूरस्य भावः आविदूर्यं आलंबने अवष्टभ्य आस्ते अवष्टभ्य ति
ष्ठते आविदूर्ये अवष्टब्धा शरत् आलंबनाविदूर्ययोरिति किं अवस्तब्धो वृषलः शी
तेन अनिर्णयार्थमारंभः ६७ वेश्च स्वनो भोजने वेरुपसर्गादवाच्चोत्तरस्य भोजनेर्थे
स्वनतेः सकारस्य मूर्द्धन्य आदेशो भवति विष्वणति व्यष्वणत् विषष्वाण अवष्व
णति अवाष्वणत् अवषष्वाण अभ्यवहारः क्रियाविशेषो वेगम्यते यस्वननमिति
कि विस्वनति मृदंगः ६८ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां यास्व
ननमिति किं विस्वनति मृदंगः ६८ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां
परिनिविभ्य उत्तरेषां सेवसितसयसिवुसहसुट्स्तुस्वंज इत्येतेषां स
स्य मूर्द्धन्यो भवति परिषेवते निषेवते पर्यषेवत न्यषेवत व्यषेवत परिषिषेवि
षते सित परिषितः निषितः सय परिषयः निषयः विषयः सिवु परिषीव्यति
नि षीव्यति विषीव्यति पर्यषीव्यत् न्यषीव्यत् पर्यसीव्यत् न्यसीव्यत् व्यषीव्यत् स
ह परिषहते निषहते विषहते पर्यषहत न्यषहत पर्यसहत न्यसहत व्यस
हत सुट् परिष्करोति पर्यष्करोत् न्यस्करोत् स्तु परिष्टौति निष्टौति विष्टौति पर्यष्टौत् न्य
ष्टौत् पर्यस्तौत् व्यस्तौत् न्यस्तौत् स्वंज परिष्वजते निष्वजते विष्वजते निःस्वज

ते । विस्वनते पूर्वं स्वजत न्यष्वजत न्यस्वजत व्यष्वजत व्यस्वजत पूर्वेणैव सिद्धे स्तुसञ्जेरु
हरणमुत्तरार्थम् अड्व्यवायेऽपि विभाषा यथा स्यात् ६९ सिवादीनां वाड्व्यवायेऽपि अनन्तरसूत्रे
सेवेः सदः स्तु स्वञ्जामिति सितसयादयः । तेषां सितादीनाम् अड्व्यवायेऽपि परिनिविभ्यः उत्तरस्य
सकारस्य वा मूर्द्धन्यो भवति यथा चैवोदाहृतं ७० अनुविपर्यभिनिभ्यः ; स्यन्दतेरप्राणिषु
अनुविपर्यभिनिभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य मूर्द्धन्यो भवति । अनुष्यन्
दते तैलं विष्यन्दते परिष्यन्दते अभिष्यन्दते निष्यन्दते अनुस्यन्दते विस्यन्दते परिस्यन्दते अ
भिस्यन्दते निस्यन्दते अप्राणिष्विति किं अनुस्यन्दते मत्स्योदके अप्राणिविषयस्यापि स्यन्द
तेः षत्वविकल्पो भवति अनुस्यन्देते मत्स्योदके इति अप्राणिष्विति पर्युदासोऽयं न प्रस
ज्यप्रतिषेधः ७१ वेः स्कन्देरनिष्ठायाम् । वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्द्धन्यो वा भव
ति अनिष्ठायां विषये विष्कन्ता विस्कन्ता विष्कन्तव्यं विस्कन्तव्यं अनिष्ठायामिति किं
विस्कन्नः ७२ परेश्च । योगविभाग उत्तरार्थः परिपूर्वस्य स्कन्देः सकारस्य वा मूर्द्धन्या
देशो भवति परिष्कन्ता परिस्कन्ता परिष्कन्तव्यं परिस्कन्तव्यं परिष्कण्णः परिस्कन्नः पूर्वयोगे
नकारणात् सामर्थ्यान्निष्ठायामप्यनुवर्तते परिष्कण्णः परिस्कन्नः ७३ परिस्कन्दः प्राच्यभर
तेषु परिस्कन्दशब्दे मूर्द्धन्याभावो निपात्यते प्राच्यभरतेषु परिस्कन्दः अन्यत्र परिष्कन्दः अथवा
निष्ठायां नकारस्य णत्वाभावः । अन्यत्र परिष्कण्णः भरतग्रहणं [illegible] विशेषणम् ७४ स्फुरतिस्फु
लत्योर्निर्निविभ्यः ; स्फुरतिस्फुलत्योः सकारस्य निर्निवि इत्येतेभ्य उत्तरस्य वा मूर्द्धन्यादेशो भवति स्फु
रतिस्फुलत्योः सकारस्य निर्निवि इत्येतेभ्य उत्तरस्य वा मूर्द्धन्यादेशो भवति स्फुरति निःष्फु
रति निष्फुरति विष्फुरति निःस्फुरति विस्फुरति स्फुलति निःष्फुलति निष्फुलति विष्फुलति
विस्फुलति निःस्फुलति निस्फुलति ७५ स्कभ्नातेर्नित्यं वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्द्ध
न्यादेशो भवति निस्फुलति ७५ स्कभ्नातेर्नित्यं वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्द्धन्यादे

ष्णो भवति विष्कभ्नाति विष्कम्भिता । विष्कम्भितुं विष्कम्भितव्यं ७६ यणः षीढ्वं लुङ्लि
ड्धो गात् मूर्द्धन्य इति वर्त्तते इणन्तादंगात्परस्य धीढ्वं लुङ्लिटो धस्य धकारस्य
मूर्द्धन्यादेशो भवति च्योषीढ्वं प्लोषीढ्वं लुङ् अच्योढ्वं लिट् चकृढ्वे इणकोरिति वर्त्त
का माने पुनरिणग्रहणं कवर्गान्निवृत्त्यर्थं च धीढ्वं षीढ्वं लुङ्लिटामिति किं स्तोध्वे अस्तुध्वं
षि अंगादिति किं परिवेविषीध्वं अर्थवद्ग्रहणादपि सिद्धे एतज्ज्ञापयति ७७ विभाषेटः इणः
परस्मादिटः उत्तरेषां षीढ्वं लुङ्लिटां धस्य धकारस्य मूर्द्धन्यादेशो भवति विभाषा
लविषीढ्वं लविषीध्वं लविषीढ्वं पविषीढ्वं लुङ् अलविढ्वं अलविध्वं लुलुविढ्वे लुलुवि
ध्वे इणन्तादंगादनन्तरस्येति चोविधि नमिति न भवति च ७ चेन्नेति अपरेषां दर्शने अंगा
दितीति वर्त्तते इणस्यानुवर्त्तते तत्र अयकारादेव इणः परोनन्तर इति पक्षे भवितव्यं मूर्द्ध
न्येनेति ७८ समासेऽङ्गुलेः सङ्गः सङ्गशब्दस्य अङ्गुलेरुत्तरस्य समासे मूर्द्धन्यादेशो भव
ति अङ्गुलिषङ्गा यवागूः अङ्गुलिषङ्गः गाः सादयति समास इति किं अङ्गुलेः सङ्गं पश्य
ति ७९ भीरेः स्थानं स्थानेः सकारस्य भीरोरुत्तरस्य समासे मूर्द्धन्यादेशो भवति भीरुष्ठा
नं समास इत्येव भीरोः स्थाने ८० अग्नेः स्तुत्स्तोमसोमाः अग्नेरुत्तरस्य स्तुत्स्तोमसो
म इत्येतेषां मूर्द्धन्यादेशो भवति समासे अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नेर्दीर्घा
त्सोम इत्येतेषां मूर्द्धन्यादेशो भवति समासे अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नी
र्दीर्घात्सोमस्येष्यते नेह भवति अग्निसोमौ माणवकौ तथा ज्योतिरुक्तिः सोमो लक्ष
विशेषः अग्निसोमौ समास इत्येव अग्नेः सोमः ८१ ज्योतिरायुषः स्तोमः ज्योतिस् आ
युस् इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्द्धन्यादेशो भवति समासे ज्योतिष्टोमः
समास इत्येव ज्योतिस्तेजो दहति ८२ मातृपितृभ्यां स्वसुः मातृपितृ इत्येताभ्यामुत्तरस्य
स्वसृशब्दस्य सकारस्य मूर्द्धन्यादेशो भवति मातृष्वसा पितृष्वसा ८३ मातुः पितुर्भ्यां

मन्यतरस्यां मातृपितृभ्यामुत्तरस्य स्वसृशब्दस्य समासे मूर्द्धन्यादेशो
भवति। मातुःष्वसा मातुःस्वसा पितुःष्वसा पितुःस्वसा मातुःपितुरिति किं
तयोर्ग्रहणं एकादेशो विकृतस्यानन्यवत्त्वात् विसर्जनीयोत्तरस्य [illegible] कारान्ता
च्च षत्वं भवति समासइत्येव वक्तव्ये मा भूत् मातुः स्वसेत्येव नित्यं भवति ॥८॥ अभि
निसः स्तनः शब्दसंज्ञायां अभिनिस इत्येतस्मादुत्तरस्य स्तन इति सकारस्य मूर्द्ध
न्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां अभिनिःष्टनो वर्णः अभिनिष्टनो विस
र्जनीयः अभिनिःस्तनो वर्णः अभिनिःस्तनो विसर्जनीयः शब्दसंज्ञायामिति किं अ
भिनिःस्तनति मृदंगः समासइत्यतः प्रभृति निवृत्तं ॥९॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्प
रः उपसर्गस्थान्निमित्तात् प्रादुसश्चोत्तरस्य यकारपरस्याच्परस्य च अस्तेः स
कारस्य मूर्द्धन्यादेशो भवति अभिष्यात् अभिषेति विषति निषति प्रादुःषति निष्यात्
विष्यात् प्रादुःष्यात् उपसर्गप्रादुर्भ्यामिति किं दधि स्यात् मधु स्यात् अस्तीति किं
अनुसृतं विसृतं यच्परस्येत्यपि अस्तिग्रहणे सकारमेव प्रतिउपसर्गात् आपद्यते प्रादुः
शब्दस्य च कुर्भ्वस्तिषु योगविभक्त्यत्रापि उपसर्गः तथाप्येवमनुदाहृतं अनुसृते अ
नुसृतः अनुसृताः अपास्य आनुसेयः सुआदिभ्यो द्विककारलोपश्च लोपः यच्परइति किं
स्तः विस्तः प्रादुस्तः ॥१०॥ सुविनिर्दुर्भ्यः सुपिसूतिसमाः सुविनिर्दुर् इत्येतेभ्य उत्तरस्य सुपि
सूति सम इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति सुपीति कृतसंप्रसारणस्य ग्रहणं ते सु
षुप्तः विषुप्तः दुःषुप्तः सूतिरिति स्वरूपग्रहणं सुषूतिः विषूतिः निषूतिः दुःषूतिः सु
म सुषमं विषमं निःषमं दुःषमं सुपेः षत्वं स्वपेर्मा भूत् विष्वक् विसृष्यातेति केनेत्यमुलो
दिषु प्रोप्तेत्र सुपरिष्टं पूर्वमसंप्रसारणं २ स्वापीनां नियमो नात्र प्राप्ति [illegible] सपि अनेक
विषुषुः दुःषुपि मन्त्रोद्धिरुच्यते पूर्वत्रासिद्धं येन द्विर्वचनमतिकृतेषु [illegible] द्विर्वचनं

४२८

८७ निनदीभ्यां स्नातेः। कौशले निनदी इत्येताभ्यामुत्तरस्य स्नातेः सकारस्य मूर्धन्यादे
शो भवति कौशले गम्यमाने निष्णातः कटककरणे। निष्णातो रज्जुवर्तने। नद्यां स्नातीति
नदीष्णः। सुपि स्थ इत्यत्र सुपीति योगविभागात् कप्रत्ययः। कौशल इति किं। निःस्नातः
नद्यां स्नातो नदीस्नातः। इति ८८ सूत्रे प्रतिस्नातं प्रतिष्णातमिति निपात्यते सूत्रं चेद्
भवति प्रतिष्णातं सूत्रं शुद्धमित्यर्थः। प्रतिस्नातमन्यत्र ८९ कापिष्ठलो गोत्रे कपि
ष्ठल इति निपात्यते गोत्रविषये कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः। गोत्र इति किं क
पिस्थलं कपिस्थलं ९० प्रष्ठोऽग्रगामिनि प्रष्ठ इति निपात्यते अग्रगामिनि अभिधेये प्र
तिष्ठत इति प्रष्ठः। प्रष्ठोऽश्वः। प्रष्ठो गौः। अग्रतो गच्छतीत्यर्थः। अग्रगामिनीति किं प्रस्थो
हिमवतः। प्रस्थः। प्रस्थे व्रीहीणां ९१ वृक्षासनयोर्विष्टरः। विष्टर इति निपात्यते वृक्षे आ
सने च वाच्ये। विपूर्वस्य स्तृणातेः। निपात्यते विष्टरो वृक्षः। विष्टरमासनं वृक्षास
नयोरिति किं वाक्यस्य विस्तरः। विस्तरः कटस्य ९२ छन्दोनाम्नि च। छन्दोनाम्नि
च विष्टार इति निपात्यते विपूर्वात् स्तृणातेः घञ्। तस्य छन्दोनाम्नि विष्टारपङ्क्तिः
इति विष्टार इत्यत्र प्रकृते विष्टार इति विज्ञायते विष्टारपङ्क्तिः। छन्दः। विष्टारबृहती छन्दः। छन्
दोनाम्नीति किं पटस्य विस्तारः। ९३ गवियुधिभ्यां स्थिरः। गवि युधि इत्येताभ्यामुत्तरस्य
स्थिरस्य सकारस्य मूर्धन्यादेशो भवति स्थिरः। इति। गविष्ठिरः। युधिष्ठिरः। अस्थिरः
इति किं स्थिरस्य। गविष्ठिरः। युधिष्ठिरः। गोस्थिरः ... लेनादपि एतस्मादेव निपातनात्
समासे अलुग्भवति ९४ विकुशमिपरिभ्यः स्थलं। विकुशमिपरि इत्येतेभ्य उत्तरस्य स्थल
सकारस्य मूर्धन्यादेशो भवति विष्ठलं। कुष्ठलं। शमिष्ठलं ९५ अम्बाम्बगोभूमिसव्या
पद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः। अम्बष्ठः। आम्बष्ठः। गोभूमिस
व्यापद्वित्रिकुशेकुशङ्कु ... मेबर्हिर्दिवि अग्नि इत्येतेभ्य उत्त

शेकु ८

शंकुष्ठः उंजिष्ठः

स्थस्य ग्राव्य: सकारस्य मूर्द्धन्यादेशो भवति अंबष्ठ: आंबष्ठ: गोष्ठ: भूमिष्ठ: सव्येष्ठ: अप
ष्ठ: द्विष्ठ: त्रिष्ठ: कुष्ठ: शेकुष्ठ: अंगुष्ठ: मंजिष्ठ: परमेष्ठ: बर्हिष्ठ: दिविष्ठ: अग्निष्ठ:
स्था स्थित्स्थूणामिति वक्तव्य सव्येष्ठा परमेष्ठी सव्येष्ठा सारथि: सव्येष्ठेति दिवे कदन्ति त्यजः अधि
ति वर्त्तमानेन यतेडिच्चोत्परो डिच्चेव सव्येस्य षष्ठं दसीति सव्यमूर्द्धेडपपदेति धते कटि प्रत्यय:
डिच्चदि लोप: तत्पुरुषे कृतवकुलमिति सप्तम्या: अलुक सव्येष्ठ इति। स्थिते सुकृदु शानद्या
दिनानड: सर्वनामस्थाने चेति दीर्घ: परमेष्ठी गमेरिति नित्यत: इन्प्रत्ययोनुवर्त्तमानेपर
मेस्थ: किंच्चेति इन्प्रत्यय: किच्चकि त्वादौ तो लोप: इष्टिचेस्था कारलोप: परमेष्ठि नितिस्थि
ते सु सौ चेति दीर्घ: सव्येष्ठा सारथिरिति पूर्ववत् ८६ सुषामादिषु च सुषामादिषु शब्देषु स
कारस्य मूर्द्धन्यादेशो भवति शोभनं साम यस्य असौ सुषामा ब्राह्मण: निषामा दुषामा
सुषेधः निषेधः दुष्षेधः सुशब्दस्य कर्मप्रवचनीयसंज्ञत्वात् निरदुरशब्दयोश्च क्रियायोग
नविषयत्वात् अनुपसर्गे सति नियातो यं प्रत्यधसेर्गत्याविति वा प्राप्ति षेधः बाधनार्थ सुषंधि:
दुषंधि: निषंधि सुष्टु दुष्टु: तिष्ठते रुगादिष्वे तो कुत्स्यापोजते नष्टाति षेध बाधनार्थो षपा
द: ष्ठतिलिका प्रतिस्तात्रा कायम् कन्प्रत्ययांता शब्दस्याद्यातेतत्ता षाढ नौषेचनं दुंदुभिषेव
ण ८६ एति संज्ञायामगात् एकारपरस्य सकारस्य मूर्द्धन्यादेशो भवति इण्कोरुत्तरस्य अगका
रात्परस्य संज्ञाविषये हरिषेण: वारिषेण: भनुषेण: एतीति किं हरिसिक्त: संज्ञायामिति किं
पृथ्वी सेनायस्य सपृथुसेनो राजा अगादिति किं विष्वक्सेन: हरि इण्कोरित्येव सर्वसेना: ८४
नक्षत्राद्वा एति संज्ञायामगकारान्मूर्द्धन्यादेशो भवति रोहिणिषेण: रोहिणिसेन: भरणिषे
ण: भरणिसेन: अगकारादित्येव शतभिषक्सेन: अविहिमलक्षणो मूर्द्धन्य: सुषामादिषु द्रष्ट
व्य: ९८ हृस्वात्तादौ तद्धिते हृस्वादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति तकारादौ तद्धिते प

नाद्रिते परतः । नरतमसमयजुःसल्लुक् । तस्य पूरणानि प्रयोजयंति नरतर्पिषुरं यजुष्टुरं
यजुष्कं नमसे पिषुर्मं यजुष्टुमं नयचनुष्टये भ्रातृणां निकेताः ; नचपर्पिषुं
यजुष्टु नतस्पिषुः यजुष्टुः तस्य आविष्णोर्वक्रस्यादिति किं गीस्तारा धूस्तारा नादि
का वितिकिं सार्पिस्साद्भवति पान्तृयस्य सान्त्यपदाधो इति सन्त्यपि प्राप्ति बधेत्र कृतिसूका
शि रस्युस्यात् नाद्रितद्भुतिकिं सर्पिल्लरति तिङः तस्य प्राप्ति बधो वक्तव्यः ; भिघस्तरां छिंक
स्तरां ४९ निसस्तपत्तावनासेवने निसस्सकारस्य मूर्धन्यादेशो भवति
नासेवने इति किं आसेवने पुनः ; कुरणां निष्टपति सुवर्णं सकृद् अग्नौ तापयत्यर्थः ; तपतौ परतः ; अ
४२५ किं निस्तपति पुनः पुनरग्निं स्पर्शयतीत्यर्थः ; निष्टप्तं रक्षः ; निष्टप्ता अरातयः ; अनासेवन इति
प्या सेवननविवक्षाते छंदसो वा वर्णः ; विकार १०० युष्मत्तत्ततक्षुष्वन्तः ; इत्यत्र सकृद
नत्तइत्येतेषु तकारादिषु परतः ; सकारस्य मूर्धन्यादेशो भवति पादयुष्मदन्तेन
पादे भवति पादमध्ये भवतीत्यर्थः ; युष्मत्पादे तु ; त्वं चात्ते नमव आग्निष्टं नो मा सीतु त्वा सर्वेत्रस्य कान्तु, गत,
अग्निष्ट्वा वर्धयामसि ; ते अग्निष्टे विश्वमानय तवत्र अग्निष्टव अग्निष्टव विश्वमाव
णोति ततत्तु सपावापृथिवी, तच्छुनत्तु ; अंतपादमिति किं नित्यमात्मनेविदं भूदग्नि
स्तम्भुनमग्न जातवेदो विसर्पिणी यजुष्वो केषां यजुषिविषये युष्मत्ततत्तत्तु परतः ; ए
के षां मा चार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति अर्चिभिष्टुं आग्निष्टेन अग्नि स्ते
न्ते अग्निष्टत्तु अग्निष्टत्तु अग्निस्तत्तु अर्चिभिष्टत्तु ; अर्चिभिस्तत्तु ; २ स्तत्तु स्तो मयो
छंदसि स्तुत्स्तोम इत्येतयोः परयोः ; छंदसिविषये सकारस्य मूर्धन्यादेशो भवति एके
षामाचार्याणां मतेन त्रिभिष्टुत्अग्निष्टोम छोदगष्टोमं गोस्तोम छोदगष्टोमं पूर्वपदादि
त्येवासिद्धे प्रपंचार्थमिदं तु पूर्वपदात् पूर्वपदस्थान्निमित्तादुत्तरस्य सकारस्य मूर्धन्या

द्धेणो भवति एकेषामाचार्याणां मतेन त्रिभिष्टुतस्य गोष्टोमं षोडशिनं गोस्तोमं षोडा
शिनं पूर्वपदादित्येव सिद्धे आरंभोयमिदं तु पूर्वपदात् पूर्वपदस्थान्निमित्तादु
त्तरस्य सकारस्य मूर्द्धन्यादेशो भवति छंदसि विषये एकेषामाचार्याणां मतेन द्वि
षंधिः द्विसंधिः त्रिषंधिः त्रिसंधिः मधुष्ठालं मधु द्विषाहस्रं चिन्वीत असमासेपि युष्मे
वपदं तदपीष्यते पूर्वपदादिति तेनेहापि। त्रिमं पादायाः सुञः सुञिति निपातो
गृह्यते तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति छंदसि वि
षये अभीषुणः सखीनां ऊ इषु। सुञ इति पूर्वपरस्य दीर्घत्वं नलितस्य पादादेर्देशस्य
नस्वधातुस्थो इषुभ्य इति णत्वं ऊर्ध्वं ऊषुणः ५ सनोतेरनः षणुदाने इत्येतस्य धा
तोरनकारान्तस्य सकारस्य मूर्द्धन्यादेशो भवति गोषा नृषा जनसनखनक्रमगमो वि
ट्। विड्वनोरनुनासिकस्यात् आत्वं अन इति किं गोसनिः वाचश्छंदसि वनसनरादिनवा मु
दीरयन् पूर्वपदादित्येव सिद्धे नियमार्थमिदं अत्र केचित्सवनादिपाठात् सनिर्निय
मस्य फलं भवतीति सिसानयिषतीति प्रत्युदाहरन्ते सिसानिषतेरुप्रत्ययः। सिसनी
र्षुः प्रत्यये ६ सहेः पृतनर्ताभ्यां च पृतना ऋत इत्येताभ्यामुत्तरस्य सहेः सकारस्य मू
र्द्धन्यादेशो भवति पृतनाषाहं ऋताषाहं केचिद्योगविभागं सहेरिति कुर्वंति ऋतेनीषह
मित्यादि यथा स्यात् ऋतनिवृत्यर्थं पूर्वपदस्य संहितायामेतद्दीर्घत्वं च अवग्रहे ऋतेहिमुक्ते
तिसहामित्येव भवति चकारोनुक्तसमुच्चयार्थः तेन ऋतीषहमिति सिद्धं ७ न रपरसृ
पिसृजिस्पृशिस्पृहि सवनादीनां च न रपरस्य सकारस्य सृपिसृजिस्पृशिस्पृहि इत्येते
षां सवनादीनां च मूर्द्धन्यादेशो भवति परमस्य विस्रंसिकायाः कांडं जुहोति वि
स्रसः कपयति सृपि पुराक्रूरस्य विसृपः सृजि वाचो विसर्जनात् स्पृशि दिविस्पृशं स्पृहि
कि निस्पृहं कपयति सवनादीनां सवने २ सोमे २ सवनमुखे २ किंसं २ किंस्प

नीतिकिंसः अनुसवनमनुसवनं गोसनिं अश्वसनि पूर्वपदादिति प्राप्ते प्रतिषे
धः अश्वसनिग्रहणमनिणोपि षत्वमस्तीति ज्ञापनार्थं जलाषाट्
का ह्मिन्तोनन्ताधुभवति क्वचिदेवं गणपाठः सवने सवन सवने मुखे अश्वत्था
त्रि नमनुसवनं संज्ञायां वृत्तिसवनं सोमे २ सुते २ सवनमुखे २ अनुसव
सनिं अश्वसनि ८ सात्पदाद्योः सादिति चेतस्य सकारस्य पदादेश्च मूर्धन्यो न सुतस्तं २ गो
वति विभाषा साति कात्स्न्ये च स्यय सकारस्यात्याप्तादि पदादेश्चादेर्मूर्धन्यादेशोम
ति सात् दधिसात् मधुसात् पदादेः दधिसिंचति मधुसिंचति ९ सकारस्यात् ग्र धात्वादेशः सः
१२६ रस्य यङि परतः मूर्धन्यादेशो भवति सेसिच्यते अभिसेसिच्यते उपसर्गादिति सिचो यङि सिचः सका
दिः सात्पदादिलक्षणमेव प्राप्ति षेधः कथं तेन सिचो यङीति न स्यादयं प्रतिषेधः यो प्रा
नभवति यङीति किं अभिषिषिचति १० सेधतेर्गतौ गतौ वर्तमानस्य सेधतेः सर्वत्र
स्य मूर्धन्यादेशो भवति अभिसेधयति गाः गताविति किं शिष्यमकार्यं स्यात् सेधयते सकार
ति ११ प्रतिस्तब्धनिस्तब्धौ च प्रतिस्तब्ध निस्तब्ध इत्येतौ मूर्धन्याप्रतिषेधय
ते स्तम्भेरिति चा प्रतिविध्यते प्रतिस्तब्धः निस्तब्धः १२ सोढः ११ सहिरयं सोढ
भूतो गृह्यते तस्य सकारस्य मूर्धन्यादेशो भवति परिनिविभ्य इति प्राप्तो प्रतिविध
नेप सिसोढ परिसोढं परिसोढव्यं सोढभूतं किं परिषहते १४ स्तम्भुसिवुसहां
चङि स्तम्भसिवुसहां चङि परतः सकारस्य मूर्धन्यादेशो भवति स्तम्भेरिति
प्राप्तेः परिनिविभ्य इति च मूर्धन्यः प्रतिषिध्यते स्तम्भु अभ्यात स्तम्भतपर्यन्तस्तम्भतस्ति
नु पर्यसीषिवत् न्यसीषिवत् पर्यसीषहत् व्यसीषहत् स्तम्भुसिवुसहां चङ्युपसर्गा
दितिवक्तव्यं उपसर्गात् प्राप्तादि ति सर्व प्रतिषेधे यथा स्यात् अभ्यासात् प्राप्तादिलेस्यां

साधूदिति तथा चैवोदाहृतं ॥१५ सुनोतेः स्यसनोः ॥ सुनोतेर्धातोः सकारस्य मूर्धन्यादेशो
न भवति स्यसनि च परतः ॥ अभिसोष्यति परिसोष्यति अभ्यसोष्यत पर्यसोष्यत
सति किमुदाहरणं सुसूषति नैतदस्ति प्रयोजनं तत्र स्तौतिण्योरेव षण्यभ्यासादि
ति नियमान्न भविष्यति सुदन्तं किमभिसुसूषति एतदपि नास्ति स्थादिष्वभ्यासादि
भ्यासस्येति नियमात् सुदन्तं सोभिसुसूषते तत्र न्याय्यं ॥ अभिसुसूरिति स्थादिष्वभ्यासेनचा
त्रापि सनुषभूतो न भवति अभ्यासात्पातिरस्तीत्यत उदाहरणमि
त्यपरे ॥१७ सदिरप्रतेः ॥ परस्य लिटि सदिर्धातोरुत्तरस्य तयोर्धो लिटि स्यसनोरिति किं
सकारस्य मूर्धन्यो भवति अभिषिषाद परिषसाद विषसाद विषसाद ॥ परस्य
नेः परिषस्वजाते परिषस्वजिरे स्वंजः ॥ सेयो गादेशः पिपविषन्स्य लिटि विभाषा किं त्वामि
षंति पदे नुवर्णलोपः ॥१८ निव्यभिभ्योड्व्यवाये वा छंदसि ॥ निविअभि इत्येते भ्यःप
रस्य सकारस्य अड्व्यवाये सति छंदसि विषये मूर्धन्यादेशो वा न भवति
न्यसीदत् पितरो नून्यसीदत्पितरो नूनं ॥ व्यषीदत् व्यसीदत् अभ्यषीदत् अभ्यसीदत्
दिष्टं ज्योतिरिति तदिहतानुवर्तते सामान्येनेव तत्र वचनं व्याष्ठौ न्यस्तौत्
अभ्यष्टौत् अभ्यस्तौत् इत्येतदपि सिद्धं भवति १७ तृनूकारो काप्यो वा तोस्य
प्यौसु अभ्यय स्ये सक्रूनीय ॥ पाद ॥ नु रषाभ्यां नो णः ॥ समानपदे रेफषकारा
भ्यां परस्य नकारस्य णकारादेशो भवति समानपदस्थौ चेन्निमित्तनिमित्तिनौ भवतः ॥ आस्तीर्णं
नकारस्य कुर्वन्ति पूर्णानि कुर्वाणि वर्णानां पुष्णाति तृणं कृत्वेनैव सिद्धमेतत् समानपद
इति किं अग्निर्नयति वायुर्नयति ऋवर्णाच्चेति च ऋवर्णान्निरचनस्य णकारेण
णं मुष्णाति सामान्यविधेर्ज्ञापकात् सिद्धं ऋवर्णान्मत्वं चवधाने च भवतीति प्रभृति
पुनर्न मन्नरगोति गहनं ज्ञापकं अथवा ऋवर्णादपि षत्वं भवतीत्येतदेवेतं न्याय

का
शिका

ते १ अट्कुप्वाङ्नुम्व्यवायेऽपि । अट्कुप्वाङ्नुम् इत्येतैर्व्यवायेपि रेफषकारा
भ्यामुत्तरस्य णकारादेशो भवति । अट्व्यवायेपि तावत् करणं हरणं किरिणा गि
रिणा गुरुणा । कवर्गव्यवायेपि अर्केण मूर्खेण गर्गेण अर्घेण । पवर्गव्यवाये दर्पेण
रेफेण गर्भेण चर्मणा वर्मणा । आङ्व्यवाये च पर्याणद्धं निर्याणद्धं । अड्व्यवाय इति सि
द्धे आङ्ग्रहणं पदव्यवाय इत्यस्य प्रतिषेधस्य बाधनार्थं । नुम्व्यवाये बृंहणं
बृंहणीयं । नुम्ग्रहणं अनुस्वारोपलक्षणार्थं द्रष्टव्यं तेन न बृंहणीयमिति अनु
स्वारव्यवाये नुमभावेपि णत्वं भवति । सर्पींषि चक्षुमिषः अनुस्वारो न श्रूयते अत्र
न भवति प्रेन्वनं प्रेन्वनीयमिति व्यवायेपि लक्षणार्थत्वात् पदद्वीनामिकव्यते
श्च व्यवाये णत्वं भवति २ पूर्वपदात्संज्ञायामगः । पूर्वपदस्थान्निमित्तादुत्तरस्य न
कारस्य णकारादेशो भवति संज्ञायां विषये द्रुणसः वार्ध्रीणसः खरणसः शूर्पणा
खा संज्ञायामिति किं चर्मनासिकः अग इति किं ऋगयनं केचित्तु एतन्नियमार्थं
वर्णयन्ति पूर्वपदात्संज्ञायामेव नान्यत्रेति समासपदेपि द्विसमासस्नपदेति मि
त्तानि ति नो नो वादहि पूर्वेण प्राप्तिः सत्वनियमः पूर्वपदसंबधोपुत्तरपद स्थ
स्येव णत्वं निवर्त्तयति चर्मनासिक इति न तद्वितु पूर्वपदस्थस्तु स्वार्थायण पथ
भोगीण पारायण इति अग इति योगविभागेन णत्वप्रतिषेधो न नियमस्य प्रतिषे
ध इति अपरे तु पूर्वसूत्रे समानमेव यन्ति तेन पदेन समानग्रहणमाश्रयन्ति तेषा
सङ्ग्राम एव णत्वं समानेन विधीयते समासे तु पूर्वपदे उत्तरपदविभागे दसंमानप
दस्य णत्वमप्राप्तमिति ३ वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः । समानप
त्ते ज्ञायामिति वनं त्वत्र पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः । पूर्वपदा
यामिति वनं तत्र पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्य इत्येतेभ्यः । पूर्वप

पेभ्यः परस्य वननकारस्य णकारादेशो भवति। संज्ञायां पुरगावणं मिश्रकावणं सिध्र-
कावणं शारिकावणं कोटरावणं अग्रेवणं॥ सिद्धे सत्यारम्भो नियमार्थः। एतेभ्य
पूर्वपदस्थेभ्यो नकारस्य णकारादेशो भवति नान्येभ्य इति कुवेरवनं [illegible]
नं ४ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। प्रमि
प्रनिर् अन्तर् शर इक्षु प्लक्ष आम्र कार्ष्य खदिर पीयूक्षा इत्येतेभ्य उत्तरस्य वनन
कारस्य संज्ञायामसंज्ञायामपि णकारादेशो भवति प्रवणं [illegible] नि-
र्वणं अन्तर्वणं शरवणं इक्षुवणं प्लक्षवणं [illegible] आम्र-
आम्रवणं कार्ष्यवणं खदिरवणं पीयूक्षावणं ५ विभाषौषधि-
वनस्पतिभ्यः। ओषधिवाचिवनस्पतिवाचिपूर्वपदस्थान्निमि-
त्तादुत्तरस्य णकारादेशो भवति विभाषा ओषधिभ्यस्तावत् दूर्वावणं दूर्वावनं वन-
स्पतिभ्यः शिरीषवणं शिरीषवनं बदरीवणं बदरीवनं द्व्यक्षरत्र्यक्षरेभ्य इति वक्त-
व्यं इह मा भूत् देवदारुवने भद्रदारुवने इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकाव-
नं तिमिरवनं [illegible] फलवनस्प-
ति [illegible] पुष्पफलोपगाः [illegible] ओषध्यः फलपाकान्ता [illegible]
[illegible] पूर्वपदस्थान्निमित्तात् [illegible] नकारस्य णकारादेशो भ-
वति पूर्वाह्णः [illegible]
[illegible] वाहनमाहितात् [illegible]
हितवाचिनः पूर्वपदस्थान्निमित्तादुत्तरस्य वाहननकारस्य णकारादेशो भवति
इक्षुवाहणं [illegible]

४३

स्नाहिना दिजि किं पाहिनाकृतं स्नाहिनाकृतं पाहि स्नामि कं वाकृन मि स्पर्श ; ट पा
नेदेमे पाननकार स्य पूर्वपद स्यानिमि त्त्रादुत्तरस्य दे न्ना मिधा ने णकारादे
न्नो भवति पीयते इति पानं कृत्यल्युटो बहुलमिति कर्मणि ल्युट् क्षीरपानमेषा
ते क्षीरपाणा; उशीनराः मनुष्याभिधाने देशाभिधाने गम्यमाने कुरुपाणाः ; प्राच्याः
वीरपाणा वा क्षीका ; वाह्नायपवाणा गांधाराः देशइति किं दाक्षीपानं दाक्षिपानं ; वाभा
वकरणे यो भावे करणे च यो पानशब्दः स पूर्वपदस्थानिमित्तादुत्तरस्य णकारादेशो भवति
वा पूर्वपदस्थानिमित्तादुत्तरस्य क्षीरपाणं वक्तव्ये काष्ठपाणं कारादेशो भवति
न सुरापाणं सुरापानं करणे क्षीरपाणः ; कंसः ; क्षीरपानः ; वा प्रातिपदिकान्त कथं
प्रापदीनामुपसंख्यानं गिरिणदी गिरिनदी चक्रणदी चक्रनदी चक्राणि गिरिन
तंबा १० प्रातिपदिकान्तनुम्विभक्तिषु च प्रातिपदिकान्ते नुमि विभक्तौ च यो नकार
स्य पूर्वपदस्थान्निमित्तादुत्तरस्य णकारः आदेशो भवति प्रातिपदिकान्ते नुम्विभक्तौ च यो नकार
पादिकान्ते नुम्विभक्तौ च यो नकार स्य पूर्वपदस्थानिमित्तादुत्तरस्य णकार आदेशो भवति ग्रा
कार आदेशो भवति प्रातिपदिकान्ते तावत् माषवापिणौ माषवापिनौ व्रीहिवापिणौ
णौ व्रीहिवापिनौ नुमि माषवापाणि माषवापानि व्रीहिवापाणि व्रीहिवापानि वि
भक्तौ माषवापेण माषवापेन व्रीहिवापेण व्रीहिवापेन पूर्वपदाधिकारादुत्तर
पदस्य प्रातिपदिकस्य यो नकारस्तस्यैव णत्वं भवति गर्गाणां भगिनी गर्गभगिनी
णीत्यादावन्त्य ओ गीणवत्ति स्यमिवाण्णो नभविन न मौ माषवापिणौ माषवापिनौ गर्गभगि
हिनाति कारको पपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति कृदन्ते
वसे सा सेसाति प्रातिपदिकस्योत्तरपदस्थो यो नकारो भवति तथा चनुम्

ह्णं सति समुदायमक्त्वात् उत्तरपदस्यांतो न भवति युवादीनां प्रतिषेधो वक्तव्यः आर्य
यूना क्षत्रिय यूना प्रपक्कानि दीर्घाह्नी प्रारत् ॥ ११ एकाजुत्तरपदे णः । एकाजुत्तरपद
यस्य स एकाजुत्तरपदः तस्मिन् एकाजुत्तरपदे समासे प्रातिपदिकान्त नुम् विभ
क्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति वृत्रहणौ वृत्रह
णः । नुमि क्षीरपाणि सुरापाणि विभक्तौ क्षीरपेण ॥ इति वर्त्तमाने पुनर्णग्रहणं वि
कल्पाधिकारनिवृत्त्यर्थं स्पष्टीकरणार्थं सू १२ कुमति च कवर्गवति चोत्तरपदे प्राति
पदिकान्त नुम् विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भ
वति वस्त्रयुगिणौ वस्त्रयुगिणः । नुमि वस्त्रयुगाणि विभक्तौ वस्त्रयुगेण खरयुगे
ण ॥ १३ उपसर्गादसमासेऽपि णोपदेशस्य णोपदेशो यस्यासौ णोपदेशः । णोपदे
शस्य धातोर्यो नकारस्तस्य उपसर्गपदस्थान्निमित्तादुत्तरस्य णकारादेशो भवति
असमासेऽपि प्रणमति प्रणायकः परिणमति परिणायकः प्राणायकः । णादेशो भवति
ति किं प्रगता नायका अस्माद्देशात् प्रगतनायको देशः । असमासेऽपीति किं उपसर्गादि
त्ति समासाधिकारः समास एव स्यादिति तदधिकारनिवृत्तिद्योतनार्थं णोपदे किं पूर्वपदा
दिति प्रनर्दति प्रनर्दकः १४ हिनुमीना हिनुमीना इत्येतयोरुपसर्गस्थान्निमित्तादुत्तरस्येति
रस्य नकारस्य णकारादेशो भवति प्रहिणोति प्रहिणुतः । प्रमीणाति प्रमीणीतः । निमित्तादुत्त
रग्रहणो विकृतस्यापि भवति अजादेशस्य स्थानित्वात् ॥ आनि लोट् । आनी हिनुमीना
लोडादेशस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति इत्येतस्य
प्रविशपाणि प्रयाणि परियाणि लोडिति किं प्रवपाणि मांसानि १५ नेर्गद नद प्रवपाणि
घुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च नदप नेपद
इत्येतेषूपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य णकारादेशो भवति प्रणिगदति
गदनदप

त पद घु मा स्यति हंति याति वाति द्राति प्साति वपति वहति शम स्यति चिनोति
देग्धि इत्येतेषूपसर्गस्थ; गद प्रणिगदति परिणिगदति नद प्रणिनदति परिणि
का नदति पत प्रणिपतति परिणिपतति पद प्रणिपद्यते परिणिपद्यते घु प्रणि
कृ ददाति परिणिददाति प्रणिदधाति परिणिदधाति माङ्‌ प्रणिमिमीते मेङ्‌ प्रणि
मयते माङिति माङ्‌ मेङोर्ग्रहणमिष्यते स्यति प्रणिष्यति परिणिष्यति हंति प्रणि
हंति परिणिहंति याति प्रणियाति परिणियाति वाति प्रणिवाति परिणिवाति द्राति प्रणिद्रा
ति परिणिद्राति प्साति प्रणिप्साति परिणिप्साति वाति प्रणिवाति प्रणिवाति द्रा
ति प्रणिद्राति परिणिद्राति प्साति प्रणिप्साति परिणिप्साति वपति प्रणिवपति
परिणिवपति वहति प्रणिवहति परिणिवहति शाम्यति प्रणिशाम्यति चिनोति प्रणि
चिनोति परिणिचिनोति देग्धि प्रणिदेग्धि परिणिदेग्धि अत्र वा योविचनेर्गदादिषु णत्वमि
ष्यते प्रणिगदन्तु परिणिगदन्तु १८ शेषे विभाषाकखादावषान्त उपदेशे नेर्द्दिशि वर्त्ते
उपसर्गादिति च अककारखकारादिः अषकारान्तश्च उपदेशे यो धातुः शेषवल्लस्मि
न्यसन्; उपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य विभाषा णकारादेशो भवति प्र
णिपचति प्रनिपचति प्रणिभिनत्ति प्रनिभिनत्ति अककारादाविति किं प्रनि प्र
प्रनिखादति अखकार इति किं प्रनिपिनष्टि उपदेशेऽषान्तग्रहणं किं इत्येव प्रनिवेधो करोति
स्यान्; प्रणि चकार प्रनिचखाद प्रनिपेक्ष्यामीति इत्येतेमाभूदिति वेष्टुं; प्रनिवेष्टा
वेष्टुं प्रनिवेष्टि प्रणिवेद्यति १७ अनितेः अनितेर्नकारस्योपसर्गस्थान्निमित्ता
दुत्तरस्यान्निति नकारस्य पदान्ते वर्त्तमानस्य णकारादेशो भवति हे प्राण हे प्रम
नस्येति किं प्राणिति सेधस्यापवादोऽयं अंतश्च पदांते द्वौ गृह्येते कोचित् पूर्वे स्मै त्रए वै नंद
नग्रहणं सामीप्यार्थं मन्यते संवदन्ति निमित्तसमीपस्थेऽककवर्णव्यवहिते स्थानि निनकौ

कारधोर्णः

रस्य णकारो यथा स्यादिह मा भूत् पर्यनितानीति द्वितीयमपि पदान्तस्य नायं मा भू
यिनवामेव येषांनुवेणीनीति भवितव्यमिति यद्गुणं नेषां पूर्वं रत्रे नायो
र्जगृहणेन १९ अमोरभ्यासस्य अभ्यासस्यान्ति नेरुपसर्गस्थान्निमित्तादुत्तर
योर्नकारादेर्णो भवति प्राणिणिषति प्राणिणिषतु पराणिणिषति पराणिणिषतु सु
वेत्रासिद्धौ यमद्विर्वचनं कृत्वेनाम्निनु सति पूर्वैणो वक्तनरणत्व साद्विर्वचनेकु
नेसिद्धमेन दजरेणापि वचनं तन्नुनाश्रायेनव्यमिति सूत्रमिदमारभ्यते २० हन्ते
रपूर्वस्य अकारपूर्वस्य हन्तेर्नकारस्योपसर्गस्थान्निमित्तादुत्तरे रस्य णकारादे
र्णो भवति प्रहण्यते प्रहणनं परिहणनं अन्तःपूर्वस्येति किं प्रघ्नंति परिघ्नंति
स्करणे किं चिनि प्राघानि पर्यघानि २१ वमोर्वा वकारमकारयोः परतः
रस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेर्णो भवति प्रहण्वः परिहण्वः हन्तिनका
न्वः परिहन्वः प्रहण्मः परिहण्मः प्रहन्मः परिहन्मः पूर्वेण नित्ये प्राप्ते विकल्पः प्रक
२२ अंतरदेशे अंतः शब्दादुत्तरस्य हन्तेर्नकारस्यान्तःपूर्वस्य णकारादेर्णो भवति विकल्पे
देशाभिधाने अंतर्हण्यते अंतर्हेसानं वर्तते अदेशे इति किं अंतर्हननो देशः
न्तःपूर्वस्यैव अंतर्घोति नपरकर्मणि किं अंतर्हन्यानि ७३ अयनं च अयनस्य न्नकारस्य
अंतः शब्दादुत्तरस्य णकारादेर्णो भवति अदेशाभिधाने अंतरयणं वर्तते
यणं णोभने अदेशे इत्येव अंतरयणो देशः २४ छंदस्यृदवग्रहात् ऋकारादनेर
णान्पूर्वपदादुत्तरस्य नकारस्य णकारादेर्णो भवति छंदसि विषये नृमणः पितृ
याणमिति अत्र हि नृमनः पितृयाणमिति ऋकारो वग्रहे अवग्रहणं किम
चाने यावनासिदिनाधिकारमापाय परिसमादो हि स्यु नो विग्रहे पदलदोणाद्ध मे
वग्रहग्रहणं अवगृह्यमाणादप्यनपूर्वस्याग् ऋकारान्नु अनवगृह्यमाणा

न्माभूत् । अपदान्ते वा चन्द्रको नास्ति २५ नश्च धातुस्थोरुषुभ्यः । नस्तु धातुस्थेन स्य नका
रस्य णकारादेशो भवति धातुस्थान्निमित्तादुत्तरस्योरुषुभ्यश्च छ
न्दसि विषये धातुस्थात् तावत् अग्ने रक्षाणः । शिक्षा णो अस्मिन् पुरुहूत यामनि
कानू अभीषुणः । सखीनां ऊर्ध्व ऊषुणः । ऊतये अस्मदादेशो इयं नस इत्यादिः । बहु
वचनस्य वस्नसाविति २६ उपसर्गाद्बहुलं उपसर्गस्थान्निमित्तादुत्तरस्य
नसो नकारस्य बहुलं णकारादेशो भवति प्रणः शूद्रः । प्रणायसः । प्रणो गो
नं च भवति प्रनो मुञ्चतं बहुलग्रहणाद् भाषायामपि भवति प्रणः संमुखं उप
सर्गाद्धेति नासिकायां नसादेशः । २७ कृत्यचः । कृत्स्थो यो नकारः अच उत्तरः । त
स्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति अन मान अनीय अनि
इनि निष्ठादेशाः एते णत्वं प्रयोजयन्ति अन प्रयाणं परियाणं अमानां परिमा
णमान प्रयायमाणं परियायमाणं अनीय प्रयायणीयं परियायणीयं अ
नि प्रयाणि परियाणि इनि प्रयायिणो परियायिणो निष्ठादेशः प्रहीणः परिही
णः प्रहीणवान् परिहीणवान् अच इति किं प्रमग्नः परिभुग्नः । भुजो कौटिल्ये प
स्य निष्ठा प्रत्ययः । ओदितश्चेति निष्ठानत्वं चोः कुरिति कुत्वे सिद्धं परिभुग्न इति
त्वस्य णत्वं निर्विण्णस्योपसंख्यानं निर्विण्णोस्मि खलसंयोगेन निर्विण्णोहं सर्वे सेन
२८ णेर्विभाषा एषं नाद्यो विहितं । कृत्प्रत्ययः नन स्य नकारस्योपसर्गस्थान्नि
मित्तादुत्तरस्य विभाषा णकारादेशो भवति प्रयापणं प्रयापनं परियापणं प्रया
पमाणं प्रयापणीयं प्रयापनीयं अप्रयापयिणः अप्रयापनी प्रियापिणो प्र
यापिनौ विहितविशेषणं किं प्रयाप्यमानमित्यत्र यकारव्यवधानेपि यथास्यादि
ति २९ हलश्चेजुपधात् हलादिर्यो धातुरिजुपधस्तस्मात्परो यः कृत्प्रत्ययः नस्य

नमस्कारमनुकूलतीति फलवचनानि वेद्यानि व्यासमाप्तिमनूप आचार्यो भोगेन च नु कृ
यानयतिका दीनि च वचनो नारपदानि सञ्ज्ञा या इरिकानि मिरन्तगनरन्तगनरसम
रकुवेरकमनोरइति च नन्तुच्छो नारवचदानि सञ्ज्ञाया नुट् स्तोः श्चुना श्चुः शकार
तवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकारचवर्गादेशो भवतः स्तोः श्चु
नेति यथासंख्यमत्र नेष्यते सकारस्य शकारेण चवर्गेण चाभ्यां सन्निपाते शु
कारो भवति तवर्गस्यापि च शकारेण चवर्गेण च सन्निपाते चवर्गो भवति आ
देशो यथासंख्यमिष्यते सकारस्य शकारस्तवर्गस्य चवर्ग इति सकारस्य श
कारेण सन्निपाते वृक्षश्शेते प्लक्षश्शेते तस्यैव चवर्गेण वृक्षश्चिनोति प्लक्षश्
चिनोति वृक्षश्छादयति प्लक्षश्छादयति तवर्गस्य शकारेण अग्निचिच्छादय
ति सोमसुच्छादयति अग्निचिज्जयति सोमसुज्जयति अग्निचिज्ञकारः सो
मसुञ्जकारः अग्निचिज्जकारः सोमसुञ्जकारः मस्जेः मज्जति भ्रस्जः भृज्जति वृ
श्चेः वृश्चति यजः यज्ञः याच्ञा शात् इति प्रतिषेधो ज्ञापकः संख्याता नुदेशा
भावस्य स्तोः श्चुनेति सप्तमीनिर्देशो न कृतः पूर्वेण परेण च वा श्चुना सन्नि
पाते शात् तथा प्रश्नः इति यज्ञः याच्ञा ष्टुना ष्टुः स्तोः इति वर्तते सकारतव
र्गयोः षकारटवर्गाभ्यां सन्निपाते षकारटवर्गादेशो भवतः अत्रापि तथैव सं
ख्यातानुदेशाभावः सकारस्य षकारेण सन्निपाते वृक्षष्षण्डे तस्यैव टवर्गेण वृक्ष
ष्टीकते प्लक्षष्टीकते वृक्षष्ठकारः प्लक्षष्ठकारः तवर्गस्य षकारेण पेष्टा पेष्टुं पे
ष्टव्यं कृषीष्ट कृषीष्टाः तस्यैव टवर्गेण अग्निचिट्टीकते सोमसुट्टीकते ग्र

४३५ ४४

अग्निचिद्धकारं सोमसुद्धकारं अग्निचिद्भीमः सोमसुद्भीनः अग्निचिद्धौकते सो
मसुद्धौकते अग्निचिणकारं सोमसुणकारं अनृ अज इति अनुद्रुतिमनुद्रुति ५
नपदान्तादेन मामूपदान्ताद्धवर्गात्तेरस्य स्तोष्टव्येन भवति पदान्तादिति किं
का दुद्रुलतो ड्वडोरिति किं सर्पिष्षु मे यजुष्षु मे अनामिति किं वर्ण अनुत्रुल्प
त्रि मिदमुच्यते अनाम्नवति नगरीणामिति वक्तव्यं षण्णां षण्णवति षण्णगरी ४२
४३५ तोः विनेति न तेने तवर्गस्य चकारेण दुक्तं न भवति अग्निचित्षण्डे सोम
सुत्षण्डे महान्षण्डे ४३ नान्ते तोरिति वर्तते शकारादुत्तरस्य तवर्गस्य यदु
सू ४२ क्तं तत्र भवति प्रश्नः विश्नः ४४ यमो नु नासिके नु नासिको वा । यरः पदान्तस्यानु
नासिके परतः वा नु नासिकादेशो भवति वाग्नयति वाङ्नयति त्रिष्टुलिङ्नयति
त्रिष्टुलिग्नयति अग्निचिद्नयति अग्निचिन्नयति विप्रुड्नयति विप्रुण्नयति पदान्त
स्येत्येव वेद्मि कुर्मातिं यमो नु नासिके यथासंख्यं भाषायां नित्यं वचनं कर्त
व्यं वाङ्मात्र वाक्स्थित चिन्मात्रा विनानासिके ४४ अचोऽरहाभ्यां द्वे यरुद्वति
वर्तते अच उत्तरो यो रेफहकारौ ताभ्यां मुत्तरस्य यरो द्वे भवतः अर्कः अ
र्कः ब्रह्मा अपह्नुते अच इति किं कुते कुलयति ४५ अनचि च अच इति वर्तते
यरुद्वति च अच इति किं कुते कुलयति ४५ अनचि च अच इति वर्तते यरुद्वतिच
अच उत्तरस्य यरो अनचि परतो द्वे भवतः दध्यत्र मध्वत्र अच इति वो अमिति स्त
न यणो मयो द्वे भवतः इति वक्तव्यं केचिदत्र यण इति पञ्चमी मय इति
। षष्ठी दुलो वा मुल्का वल्मीकं उल्का पञ्चमी यण इति षष्ठी मय इति

चमी तेषां दध्यत्र मध्वत्र इत्युदाहरणं ज्ञेयं; द्वियो द्वे भवतः इति वक्तव्यं अत्रादि
तयेवमूवेनुव्याम्येति शुक्तत्तरस्य द्वियो द्वे भवतः; स्थाना स्थानी अथवा
शूरः इति षष्ठी द्वियः इति वचमी वत्स्मेः कृत्कष्यादि वत्सः; अप्सरः; इष्वदा
कमणे अवसाने च यरो द्वे भवतः; इति वक्तव्ये वाक्वाक् त्वक्त्वक् ८६ नादिन्या
क्रोशे पुत्रस्य आदिनि द्वे वक्तव्ये; आक्रोशे गम्यमाने पुत्रशब्दस्य तन द्वे भव
तः; अनाचिचेति चादिः; प्रतिषेधे पुत्रादिनी त्वमसि पापे आक्रोश इति
किं तत्त्वं वाक्यते द्विवचनं भवत्येव पुत्रीन जाति पुत्रादिनी शिशुमारी व्याघ्री
तत्स्येश्चेति वक्तव्यं पुत्रपुत्रादिनी त्वमसि पापे आक्रोश इति किं कृततस्य
पर इति वक्तव्यं पुत्रहती पुत्रहती पुत्रजग्धी पुत्रजग्धी ८५ चयो द्वितीयाः शरि
पौष्करसादेः चयो द्वितीया भवन्ति शरि परतः; पौष्करसादेराचार्यस्य मतेन
तकारस्य थकारो वत्सः वत्थकारस्य खकारः; क्षीरं ख्षीरं; एवकारस्य फका
रः अप्सरा ८७ शरोऽचि वर्तते शरः अचि परतः न द्वे भवतः; अचो रहा
भ्यामिति प्राप्ते; प्रतिषेधः कर्षति वर्षति आदर्शः अदर्शः; अचो रहाभ्यां
ते ८८ त्रिप्रभृतिषु शाकटायनस्य त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायन
स्याचार्यस्य मतेन न द्वे भवतः; इन्द्र; चन्द्र; उष्ट्र; राष्ट्र; भ्राष्ट्र ८९ सर्वत्र शाक
ल्यस्य शाकल्यस्याचार्यस्य मतेन सर्वत्रैव द्विर्वचनं न भवति अर्कः मर्कः; ब्र
ला अपकृते ९० दीर्घादाचार्याणां दीर्घादुत्तरस्याचार्याणां मतेन न द्विर्वचनं
न भवति दात्रं पात्रं मूत्रं गोत्रं ९१ झलां जश् झशि झलां स्थाने जश् आदेशो
भवति झशि परतः; लब्धा लब्धुं लब्धव्यं दोग्धा दोग्धुं दोग्धव्यं बोद्धा बोद्धुं बोद्धव्यं
ऊर्ध्वमिति किं दम्भः; दम्यः; ९२ अभ्यासे चर्च अभ्यासे वर्तमानानां झलां चरादेशः

भवति चकाराज्झश्छ चिवनिछति चिछिन्माति चिकामयिषति तिछुमाति श्र
कृतिचरछ्छो भवति चिचीछति तिनीछति पिबामाति जकुरो भवति तिलाद्
यिषति जिघन्साति ऽ छौकति प्रकृतिज्झकुरञ्छो भवति जिजनिषति बुबुधे दधौ
दधो ऽछि ३ ५२ खरि च खरि च परतः, झलां चर्त्वं देशो भवति ततश्च शकां तुनानु
वर्तते पूर्वसूत्रे चानुकृष्टत्वात् मेत्राभ ते भेतव्यं युयुत्सते आरिप्सते आ
लिप्सते ५७ वावसाने झलां चरितिवर्तते अवसाने वर्तमानानां झला
नां वा चकारादेशो भवति वाक् वाग् त्वक् त्वग् श्वः लिट् श्वलिट् श्वलिड् त्रिष्टु
८ रवु ५५ अणोऽप्रगृह्यस्यानुनासिकः अनन्तरस्य प्रगृह्यसंज्ञकस्यावसाने वर्त
मानस्य चानुनासिकादेशो वा भवति दधिं २ मधुं मधु कुमारीं २ अण इति कि
कर्त्तृ कर्तृ अप्रगृह्यस्येति किं अग्नी वायू ५६ अनुस्वारस्य ययि परसव
र्णः अनुस्वारस्य ययि परतः परसवर्णादेशो भवति शङ्किता शङ्कितु
शङ्कितव्यं उञ्छिता उञ्छितु उञ्छितव्यं कुण्ठिता कुण्ठितव्यं नन्दिता नन्दितु
शङ्कि·तव्यं कम्पिता कम्पितु कम्पितव्यं ऽलंकुर्वन्ति कुर्वन्ति, एतच्च स्यासिद्ध
नन्दितव्यं स्याकारस्यानुस्वारः। क्रियते तस्यापि परसवर्णो न पुनर्नु वायु
त्वात् पूर्वस्याकारस्यासिद्धत्वान्न पुनर्णत्वं न भवति एवमनुस्वारो ऽमूर्धन्यो
एवं भवति मस्याप्यसिद्धत्वात् यथोनिकिं अक्रंस्यते तत्राचि क्रंसते ५७ वा पदान्तस्य सावी
मतिकाममस्मति ययोतिकिं अपरस्य परसवर्णादेशो भवति तं काथ चित्रं पदं एवमी
स्यानुस्वारस्य ययि परतः वा परसवर्णादेशो भवति पदान्तवर्णो यदि वर्तते तत्र स्यात् कां
नेनमः त्वं पुरुषो वधीना ५७ तोर्लि परसवर्णो भवति वर्तते तवर्गस्य लकारे
परतः परसवर्णादेशो भवति अग्निचित् लुनाति सोमसुल्लुनाति सोमसुल्लुना
ति भवांल्लुनाति महांल्लुनाति ५८ उदः स्थास्तम्भोः पूर्वस्य सवर्णो इतिवर्तते उ

उदः स्थास्तम्भोः पूर्वस्य । उद उत्तरयोः स्थास्तम्भोः पूर्वसवर्णादेशो भवति । उत्थाता उत्थातुं उ
त्थातव्यं स्तम्भेः उत्तम्भिता उत्तम्भितुं उत्तम्भितव्यं स्थास्तम्भोरिति किं
उत्स्नाता उत्स्नातुं । उदः पूर्वत्वे स्कन्देश्छन्दस्युपसंख्यानं कर्तव्यम् । अग्ने
दूरमुत्कन्दः । रोगे चेति वक्तव्यम् । उत्कन्दको नाम रोगः । कन्दतेर्वा धातुर्नर्थान्तरे । झयो होऽन्यतरस्याम्
प ६० झयो होऽन्यतरस्यां पूर्वसवर्णो इति वर्त्तते झय उत्तरस्य हकारस्य पूर्व
सवर्णादेशो भवति अन्यतरस्यां वाग्घसति वाग्हसति श्लिड्ढसति श्ल
िड्हसति अग्निचिद्धसति अग्निचिद्हसति । शश्छोऽटि झय इति वर्त्तते अन्यतरस्यां
मिति च । झय उत्तरस्य शकारस्याटि परतः छकारादेशो
भवति अन्यतरस्यां वाक्छेते वाक्शेते अग्निचिच्छेते अग्निचिच्शेते सोमसुच्छेते
सोमसुच्शेते श्लिट्छेते त्रिष्टुप्छेते छत्वममीति वक्तव्यं किं प्रयोजनं तच्छ
्लोकेन तच्छ्मश्रुणा इत्येवमर्थं । हलो यमां यमि लोपः अन्यतरस्यामिति वर्तते
हल उत्तरेषां यमां यमि परतः लोपो भवत्यन्यतरस्यां शय्या शय्य्या इत्यत्र हलो यकारो
यमः सजातीये यमि मध्यमस्य लोपो भवति शय्या शय्य्या आदित्यः आदित्य्यः
इत्यत्र तकारात्परस्य यकारस्य यकारे परतः इति कामं जातीयः । तत्र मध्यमस्य
लोपो भवति आदित्यो देवता अस्य स्थालीपाक इति आदित्यमिस्मात्र हलो यकारो
क्रमजस्तजातीयः । तत्र मध्यमस्य मध्यमस्य लोपो भवति हल इति किं । यमा
मिति किं । यमीति किं । झरो झरि सवर्णे झरो झरि सवर्णे हल उत्तरस्य
झरो झरि सवर्णे परतो लोपो भवति तत्र मध्यमस्य इत्यत्र चेत्वोत्तरकायं कामं जातये तमान

१

त्र मध्यमस्य मध्यमयोः संख्यासामान्यां वा लोपो भवति सह सक्थकस्य छप संख्याः तं
सामर्थ्यादिह च उपसर्गात् तिङ्ङिति मत्वं भवति मरुद्भिरिति किं ग्राहीणः मरीतिः किं त्रिय
पञ्चतं अल्लोपोनः पूर्वत्रासिद्धे येनस्या निवर्त्तेति स्थानिवद्भावप्राप्तिरेव पाद
त्र चकारस्य तकारे लोपः स्यात्तु सवर्णः इति किं तर्प्ता तर्प्तुं तर्प्तव्यं सवर्णग्र
हणोत्सामर्थ्यादिह संख्यातानुदेशो भवति सवर्णमात्रे लोपो विधीयते तेन
त्राणि छिन्धि छिन्ति ङकारस्य ढकारे लोपो भवति ६६ उदात्तादनुदात्तस्य स्वरितः उ
दात्तोदात्तस्यानुदात्तस्य स्वरितादेशो भवति गार्ग्यः वात्स्यः पचति पठति
त्तस्य स्वरितस्यासिद्धत्वादनुदात्तं पदमेकवर्जमित्येतन्न प्रवर्त्तते तेनोदा
त्तश्च भवति स्वरितश्च अनुदात्ते ६७ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवाना
ता उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति पूर्वेण प्राप्तः प्र
ति विधये अमार्ग्यकाश्यपगालवानामाचार्याणां मतेन उदात्ते उदयो यस्मात् सो उ
दात्तोदयः उपदात्तपरस्वरितोदयः एवं स्वरितोदये मा एव तु गार्ग्य तत्र का स्यात् त्र
न त्रयाणां च गार्ग्यपादानां अनुदात्तेपरतः गार्ग्यतराकः स्वरितो न भवति स्वरितोद
यः गार्ग्यः धावतम्य कुरुकुरु कं स्वरितं न सिद्धं नुपरतो नुदात्तं स्वरितो न भव
ति अगार्ग्यकाश्यपगालवानामिति किं गार्ग्यो यत्र गार्ग्यक्रियाकाविमतेन स्वरि
तो भवत्येव उदात्ते स्वरितपरस्य तत्र वचनं क्रियते गणसंग्रहालाभं अनेका
वाय की तेन पूजार्थं ६८ अ अ इति एकोऽत्र विवृतः अपरः संवृतः तत्र विवृत
स्य संवृतः प्रतिज्ञायते तस्मिन् तथा भूतस्यैव प्रयोगो मा भूदिति सवर्णप्रत्या
पत्तिः क्रियते दीर्घप्लुतयोरप्याने न विवृते नानाकारेण गृहणेन संवृते तेन यकोः

संवृतो न भवति संवृतेन च सर्वगुणस्यात्रिकस्य ग्रहणमिष्यते तेन सर्वगु
णः प्रत्यापद्यते ६७ इष्टोपसंख्यानवती शुद्धगुणा विवृतगूढसू
त्रार्था व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम व्याकरणस्य शरीरं प
रिनिष्ठितशास्त्रकार्यमेतावत् शिष्टः परिकरबन्धः। क्रियतेस्य ग्रन्थकारे
ण २ इति श्रीकाशिकायां वृत्तौ अष्टमस्याध्यायस्य चतुर्थः पादः। परमो
पाध्यायवामनकृतायां काशिकायां वृत्तावष्टमोऽध्यायः। समाप्तः। तत्समा
प्तौ समाप्तेयं काशिकावृत्तिः सोमम विद्धीति अवतो लोकैः रूपं अयुदि
द्गगमेकृतेषो परेष्टच्चेवअवद्धीति रूपं तस्मिन्निति सप्तम्यर्थे वनेमा
नान्तरछब्दात् अप्रत्ययोदलोपश्च निपात्यत इत्यर्थः। सामायइत्यत्रेडु
स्थाने यो विधीयते स तु प्रत्याहितस्थानेन नास्ति अल्विधिः अत्राल्विधि
त्वं नास्ति तेनाल्विधित्वाभावात् सविचेति दीर्घः। श्री शुभम शुभं भवति
लेखकस्य अथ पाठकस्य शुभं म ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥

